# ॥ वेदान्तसार ॥

.. Vedantasara ..

sanskritdocuments.org

August 3, 2016

# .. Vedantasara ..

# ॥ वेदान्तसार ॥

## Document Information

Text title : Vedantasara
File name : vedantasara.itx
Location : doc_z_misc_major_works
Author : Sadananda Yogindra (circa 15th cent.)
Language : Sanskrit
Subject : hinduism/philosophy
Transliterated by : Sunder Hattangadi, sunderh at hotmail.com
Proofread by : sunder Hattangadi sunderh at hotmail.com, Pranipata Chaitanya pranipatachaitanya at yahoo.co.in
Translated by : -
Description-comments : Basics of Vedanta Philosophy
Latest update : May 11, 2003, September 30, 2012, February 7, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

sanskritdocuments.org

# ॥ वेदान्तसार ॥

अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १॥

अर्थतोऽप्यद्वयानन्दानतीतद्वैतभानतः ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २॥

वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि
शारीरकसूत्रादीनि च ॥ ३॥

अस्य वेदान्तप्रकरणत्वात् तदीयैः एव अनुबन्धैः
तद्वत्तासिद्धेः न ते पृथगालोचनीयाः ॥ ४॥

तत्र अनुबन्धो नाम अधिकारिविषयसम्बन्धप्रयोजनानि ॥ ५॥

अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिल-
वेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं
नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया
नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता ॥ ६॥

काम्यानि - स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि ॥ ७॥

निषिद्धानि - नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि ॥ ८॥

नित्यानि - अकरणे प्रत्यवायसाधनानि सन्ध्यावन्दनादीनि ॥ ९॥

नैमित्तिकानि - पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि ॥ १०॥

प्रायश्चित्तानि - पापक्षयसाधनानि चान्द्रायणादीनि ॥ ११॥

उपासनानि - सगुणब्रह्मविषयमानसव्यापाररूपाणि
शाण्डिल्यविद्यादीनि ॥ १२॥

एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनमुपासनानां
तु चित्तैकाग्र्यं “तमेतमात्मानं वेदानुवचनेन ब्राह्मणा
विविदिषन्ति यज्ञेन” (बृ उ ४.४.२२] इत्यादि श्रुतेः
“तपसा कल्मषं हन्ति” (मनु १२ - १०४]
इत्यादि स्मृतेश्च ॥ १३॥

नित्यनैमित्तिकयोः उपासनानां त्ववान्तरफलं
पितृलोकसत्यलोकप्राप्तिः
“कर्मणा पितृलोकः विद्यया देवलोकः” (बृ उ १-५-१६]
इत्यादिश्रुतेः ॥ १४॥

साधनानि - नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविराग-
शमादिषट्कसम्पत्तिमुमुक्षुत्वानि ॥ १५॥

नित्यानित्यवस्तुविवेकस्तावद् ब्रह्मैव नित्यं वस्तु
ततोऽन्यदखिलमनित्यमिति विवेचनम् ॥ १६॥

ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां
कर्मजन्यतयानित्यत्ववदामुष्मिकाणामप्यमृतादि-
विषयभोगानामनित्यतया तेभ्यो नितरां विरतिः -
इहामुत्रार्थफलभोगविरागः ॥ १७॥

शमादयस्तु - शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः ॥ १८॥

शमस्तावत् - श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः ॥ १९॥

दमः - बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् ॥ २०॥

निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिरथवा
विहितानां कर्मणां विधिना परित्यागः ॥ २१॥

तितिक्षा - शीतोष्णादिद्वन्द्वसहिष्णुता ॥ २२॥

निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च
समाधिः - समाधानम् ॥ २३॥

गुरूपदिष्टवेदान्तवाक्येषु विश्वासः - श्रद्धा ॥ २४॥

मुमुक्षुत्वम् - मोक्षेच्छा ॥ २५॥

एवम्भूतः प्रमाताधिकारी “शान्तो दान्तः”
(बृ उ ४.४.२३) इत्यादिश्रुतेः । उक्तञ्च -
“प्रशान्तचित्ताय जितेन्द्रियाय च
प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा
प्रदेयमेतत् सततं मुमुक्षवे ॥ २६॥”
(उपदेशसाहस्री ३२४.१६.७२)
विषयः - जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं
तत्र एव वेदान्तानां तात्पर्यात् ॥ २७॥

सम्बन्धस्तु - तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य
च बोध्यबोधकभावः ॥ २८॥

प्रयोजनं तु - तदैक्यप्रमेयगताज्ञाननिवृत्तिः
स्वस्वरूपानन्दावाप्तिश्च “तरति शोकम् आत्मवित्

(छां उ ७.१.३)
इत्यादिश्रुतेः" ब्रह्मविद् ब्रह्मैव भवति "
(मुण्ड उ ३.२.९)
इत्यादिश्रुतेश्च ॥ २९॥

अयमधिकारी जननमरणादिसंसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" (मुण्ड उ १.२.१२)
इत्यादिश्रुतेः ॥ ३०॥

स गुरुः परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति
"तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥"
(मुण्ड उ १.२.१३)
इत्यादिश्रुतेः ॥ ३१॥

---

२

असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः - अध्यारोपः ॥ ३२॥

वस्तु - सच्चिदानन्दमद्वयं ब्रह्म अज्ञानादिसकलजडसमूहोऽवस्तु ॥ ३३॥

अज्ञानं तु - सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात् "देवात्मशक्तिं स्वगुणैर्निगूढाम्" (श्वेत उ १.३) इत्यादिश्रुतेश्च ॥ ३४॥

इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते ॥ ३५॥

तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशो यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः "अजामेकां" (श्वे उ ४.५) इत्यादिश्रुतेः ॥ ३६॥

इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना ॥ ३७॥

एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते सकलाज्ञानावभासकत्वात् ।
"यः सर्वज्ञः सर्ववित्" (मुण्ड उ १.१.९) इति श्रुतेः ॥ ३८॥

ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीरमानन्दप्रचुरत्वा-
त्कोशवदाच्छादकत्वाच्चानन्दमयकोशः सर्वोपरमत्वा-
त्सुषुप्तिरत एव स्थूलसूक्ष्मप्रपञ्चलयस्थानमिति च उच्यते ॥ ३९॥

यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशो यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः "इन्द्रो मायाभिः पुरुरूप ईयते" (ऋग्वेद ६.४७.१८) इत्यादिश्रुतेः ॥ ४०॥

अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः ॥ ४१॥

इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना ॥ ४२॥

एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यत एकाज्ञानावभासकत्वात् ॥ ४३॥

अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात् ॥ ४४॥

अस्यापीयमहङ्कारादिकारणत्वात्कारणशरीरमानन्द-
प्रचुरत्वात्कोशवदाच्छादकत्वाच्चानन्दमयकोशः
सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मशरीरप्रपञ्च-
लयस्थानमिति च उच्यते ॥ ४५॥

तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभि-
रज्ञानवृत्तिभिरानन्दमनुभवतः "आनन्दभुक् चेतोमुखः प्राज्ञः" (माण्डू उ ५) इति श्रुतेः सुखमहमवाप्सम् न किञ्चिदवेदिषमित्युत्थितस्यपरामर्शोपपत्तेश्च ॥ ४६॥

अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशय-जलयोरिव वाभेदः ॥ ४७॥

एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिम्बाकाशयोरिव वाभेदः "एष सर्वेश्वर (एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्)" (माण्डू उ ६) इत्यादि श्रुतेः ॥ ४८॥

वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयो-
र्वाधारभूतानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययो-
राधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते "शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते (स आत्मा स विज्ञेयः)" (माण्डू उ ७) इत्यादिश्रुतेः ॥ ४९॥

इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायः पिण्डवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्यते ॥ ५०॥

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम् ॥ ५१॥

आवरणशक्तिस्तावदल्पोऽपि मेघोऽनेकयोजनायतमादित्य-
मण्डलमवलोकयितृनयनपथपिधायकतया यथाच्छादयतीव
तथाज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिण-
मवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यम् ।
तदुक्तं - "घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा
मन्यते निष्प्रभं चातिमूढः । तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥" इति (हस्तामलकम् १०) ॥ ५२॥

अनया आवृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारसम्भावनापि
भवति यथा स्वाज्ञानेनावृतायां रज्ज्वां सर्पत्वसम्भावना ॥ ५३॥

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृत रज्जौ स्वशक्त्या
सर्पादिकमुद्भावयत्येवमज्ञानमपि स्वावृतात्मनि
स्वशक्त्याऽऽकाशादिप्रपञ्चमुद्भावयति
तादृशं सामर्थ्यम् । तदुक्तम् - "विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं
जगत् सृजेत्" इति । (वाक्यसुधा १३) ॥ ५४॥

शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं
स्वोपाधिप्रधानतयोपादानं च भवति ॥ ५५॥

यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं
स्वशरीरप्रधानतयोपादानञ्च भवति ॥ ५६॥

तमःप्रधानविक्षीपशक्तिमदज्ञानोपहितचैतन्यादाकाश
आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी
चोत्पद्यते "एतस्मादात्मन आकाशः सम्भूतः"
(तै उ २.१.१) इत्यादिश्रुतेः ॥ ५७॥

तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य ।
तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण
तेष्वाकाशादिषूत्पद्यन्ते ॥ ५८॥

एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपञ्चीकृतानि चोच्यन्ते ॥ ५९॥

एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते ॥ ६०॥

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि ॥ ६१॥

अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्मेन्द्रियपञ्चकं
वायुपञ्चकं चेति ॥ ६२॥

ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि ॥ ६३॥

एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः
पृथक् पृथक् क्रमेणोत्पद्यन्ते ॥ ६४॥

बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः ॥ ६५॥

मनो नाम सङ्कल्पविकल्पात्मिकान्तःकरणवृत्तिः ॥ ६६॥

अनयोरेव चित्ताहङ्कारयोरन्तर्भावः ॥ ६७॥

अनुसन्धानात्मिकान्तःकरणवृत्तिः चित्तम् ॥ ६८॥

अभिमानात्मिकान्तःकरणवृत्तिः अहङ्कारः ॥ ६९॥

एते पुनराकाशादिगतसात्त्विकांशेभ्यो मिलितेभ्य उत्पद्यन्ते ॥ ७०॥

एतेषां प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वम् ॥ ७१॥

इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता विज्ञानमयकोशो भवति ॥ ७२॥

अयं कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानत्वेनेहलोकपरलोकगामी
व्यवहारिको जीव इत्युच्यते ॥ ७३॥

मनस्तु ज्ञानेन्द्रियैः सहितं सन्मनोमयकोशो भवति ॥ ७४॥

कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि ॥ ७५॥

एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक् पृथक्
क्रमेणोत्पद्यन्ते ॥ ७६॥

वायवः प्राणापानव्यानोदानसमानाः ॥ ७७॥

प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती ॥ ७८॥

अपानो नामावाग्गमनवान्पाय्वादिस्थानवर्ती ॥ ७९॥

व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती ॥ ८०॥

उदानो नाम कण्ठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः ॥ ८१॥

समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः ॥ ८२॥

समीकरणन्तु परिपाककरणं रसरुधिरशुक्रपुरीषादिकरणमिति यावत् ॥ ८३॥

केचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयाख्याः पञ्चान्ये
वायवः सन्तीति वदन्ति ॥ ८४॥

तत्र नाग उद्गिरणकरः । कूर्म उन्मीलनकरः । कृकलः क्षुत्करः ।
देवदत्तो जृम्भणकरः । धनञ्जयः पोषणकरः ॥ ८५॥

एतेषां प्राणादिष्वन्तर्भावात्प्राणादयः पञ्चैवेति केचित् ॥ ८६॥

एतत्प्राणादिपञ्चकमाकाशादिगतरजोंशेभ्योमिलितेभ्य उत्पद्यते ॥ ८७॥

इदं प्राणादिपञ्चकं कर्मेन्द्रियैः सहितं सत्प्राणमयकोशो भवति ।
अस्य क्रियात्मकत्वेन रजोंशकार्यत्वम् ॥ ८८॥

एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः ।
मनोमय इच्छाशक्तिमान् करणरूपः ।
प्राणमयः क्रियाशक्तिमान् कार्यरूपः ।
योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति ।
एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमित्युच्यते ॥ ८९॥

अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा
समष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरपि भवति ॥ ९०॥

एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते
सर्वत्रानुस्यूतत्वाज्ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वाच्च ॥ ९१॥

अस्यैषा समष्टिः स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात्सूक्ष्मशरीरं
विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽतएव
स्थूलप्रपञ्चलयस्थानमिति चोच्यते ॥ ९२॥

एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् ॥ ९३॥

अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव
सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नोऽतएव
स्थूलशरीरलयस्थानमिति चोच्यते ॥ ९४॥

एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः
“प्रविविक्तभुक्तैजसः” (माण्डू उ ३) इत्यदिश्रुतेः ॥ ९५॥

अत्रापि समष्टिव्यष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदव-
च्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्चाभेदः ॥ ९६॥

एवं सूक्ष्मशरीरोत्पत्तिः ॥ ९७॥

स्थूलभूतानि तु पञ्चीकृतानि ॥ ९८॥

पञ्चीकरणं त्वाकाशादिपञ्चस्वेकैकं द्विधा समं विभज्य
तेषु दशसु भागेषु प्राथमिकान्पञ्चभागान्प्रत्येकं
चतुर्धा समं विभज्य तेषां चतुर्णां भागानां
स्वस्वद्वितीयार्धभागपरित्यागेन भागान्तरेषु योजनम् ॥ ९९॥

तदुक्तम् -

“द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥
स्वस्वेतरद्वितीयांशैर्योजनात्पञ्च पञ्चते ॥” इति ॥ ॥ १००॥

अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः
पञ्चीकरणस्याप्युपलक्षणत्वात् ॥ १०१॥

पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च
“वैशेष्यात्तु तद्वादस्तद्वादः” (ब्र सू २.४.२२)
इति न्यायेनाकाशादिव्यपदेशः सम्भवति ॥ १०२॥

तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शावग्नौ
शब्दस्पर्शरूपाण्यप्सु शब्दस्पर्शरूपरसाः पृथिव्यां
शब्दस्पर्शरूपरसगन्धाश्च ॥ १०३॥

एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्य-
मित्येतन्नामकानामुपर्युपरिविद्यमानानामतलवितलसुतलरसातल-
तलातलमहातलपातालनामकानामधोऽधोविद्यमानानां
लोकानां ब्रह्माण्डस्य तदन्तर्गतचतुर्विधस्थूलशरीराणां
तदुचितानामन्नपानादीनां चोत्पत्तिर्भवति ॥ १०४॥

चतुर्विधशरीराणि तु जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि ॥ १०५॥

जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि ॥ १०६॥

अण्डजान्यण्डेभ्यो जातानि पक्षिपन्नगादीनि ॥ १०७॥

स्वेदजानि स्वेदेभ्यो जातानि यूकमशकादीनि ॥ १०८॥

उद्भिज्जानि भूमिमुद्भिद्य जातानि लतावृक्षादीनि ॥ १०९॥

अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया
वनवज्जलाशयवद्वा समष्टिर्वृक्षवज्जलवद्वा व्यष्टिरपि भवति ॥ ११०॥

एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते
सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च ॥ १११॥

अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयकोशः
स्थूलभोगायतनत्वाच्च स्थूलशरीरं जाग्रदिति च व्यपदिश्यते ॥ ११२॥

एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते सूक्ष्मशरीराभिमानमपरित्यज्य
स्थूलशरीरादिप्रविष्टत्वात् ॥ ११३॥

अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव
हेतोरन्नमयकोशो जाग्रदिति चोच्यते ॥ ११४॥

तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन क्रमाच्छब्दस्पर्शरूपरसगन्धानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमान्नियन्त्रितेन वागादीन्द्रियपञ्चकेन क्रमाद्वचनादानगमनविसर्गानन्दांश्चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरेन्द्रियचतुष्केण क्रमात्सङ्कल्पनिश्चयाहङ्कार्यचैत्तांश्च सर्वानेतान् स्थूलविषयाननुभवतः "जागरितस्थानो बहिःप्रज्ञः" (माण्डू उ ३) इत्यादिश्रुतेः ॥ ११५॥

अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितविश्ववैश्वानरयोश्च वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिम्बाकाशवच्च पूर्ववदभेदः ॥ ११६॥

एवं पञ्चीकृतपञ्चभूतेभ्यः स्थूलप्रपञ्चोत्पत्तिः ॥ ११७॥

एतेषां स्थूलसूक्ष्मकारणप्रपञ्चानामपि समष्टिरेको महान्प्रपञ्चो भवति यथावान्तरवनानां समष्टिरेकं महद्वनं भवति यथा वावान्तरजलाशयानां समष्टिरेको महान् जलाशयः ॥ ११८॥

एतदुपहितं वैश्वानरादीश्वरपर्यन्तं चैतन्यमप्यवान्तरवनावच्छिन्नाकाशवदवान्तर जलाशयगतप्रतिबिम्बाकाशवच्चैकमेव ॥ ११९॥

आभ्यां महाप्रपञ्चतदुपहितचैतन्याभ्यां तप्तायपिण्डवदविविक्तं सदनुपहितं चैतन्यं "सर्वं खल्विदं ब्रह्म" (छान्द उ ३.१४.१) इति (महा) वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यमपि भवति ॥ १२०॥

एवं वस्तुन्यवस्त्वारोपोऽध्यारोपः सामान्येन प्रदर्शितः ॥ १२१॥

---

३

इदानीं प्रत्यगात्मनीदमिदमयमयमारोपयतीति विशेषत उच्यते ॥ १२२॥

अतिप्राकृतस्तु "आत्मा वै जायते पुत्रः" इत्यादिश्रुतेः स्वस्मिन्निव पुत्रेऽपि प्रेमदर्शनात्पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति ॥ १२३॥

चार्वाकस्तु "स वा एष पुरुषोऽन्नरसमयः" (तै उ २.१.१) इत्यादिश्रुतेः प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात्स्थूलोऽहं कृशोऽहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति ॥ १२४॥

अपरश्चार्वाकः "ते ह प्राणाः प्रजापतिं पितरमेत्योचुः" (छा उ ५.१.७)

इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति ॥ १२५॥

अपरश्चार्वाकः “अन्योऽन्तर आत्मा प्राणमयः” (तै उ २.२.१) इत्यादिश्रुतेः प्राणाभाव इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावानित्यादि अनुभवाच्च प्राण आत्मेति वदति ॥ १२६॥

अन्यस्तु चार्वाकः “अन्योऽन्तर आत्मा मनोमयः” (तै उ २.३.१) इत्यादिश्रुतेर्मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति ॥ १२७॥

बौद्धस्तु “अन्योऽन्तर आत्मा विज्ञानमयः” (तै उ २.४.१) इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति ॥ १२८॥

प्राभाकरतार्किकौ तु “अन्योऽन्तर आत्मानन्दमयः” (तै उ २.५.१) इत्यादिश्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः ॥ १२९॥

भाट्टस्तु “प्रज्ञानघन एवानन्दमयः” (माण्डू उ ५) इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितं चैतन्यमात्मेति वदति ॥ १३०॥

अपरो बौद्धः “असदेवेदमग्र आसीत्” (छा उ ६.२.१) इत्यादिश्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ॥ १३१॥

एतेषां पुत्रादीनामनात्मत्वमुच्यते ॥ १३२॥

एतैरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्वबाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव ॥ १३३॥

किञ्च प्रत्यगस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यभास्यत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च तत्तच्छ्रुतियुक्त्यनुभवभासानां बाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव ॥ १३४॥

अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः ॥ १३५॥

एवमध्यारोपः ॥ १३६॥

---

४

अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् ॥ १३७॥

तदुक्तम् -
“सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः ।
अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः ॥” इति ॥ १३८॥

तथाहि एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनान्येतदायतनभूतं ब्रह्माण्डं चैतत्सर्वमेतेषां कारणरूपं पञ्चीकृतभूतमात्रं भवति ॥ १३९॥

एतानि शब्दादिविषयसहितानि पञ्चीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापञ्चीकृतभूतमात्रं भवति ॥ १४०॥

एतानि सत्त्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्ति-व्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति ॥ १४१॥

एतदज्ञानमज्ञानोपहितं चैतन्यं चेश्वरादिकमेतदाधार-भूतानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति ॥ १४२॥

आभ्यामध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति ॥ १४३॥

तथाहि - अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवति ॥ १४४॥

एतदुपाध्युपहिताधारभूतमनुपहितं चैतन्यं तत्पदलक्ष्यार्थो भवति ॥ १४५॥

अज्ञानादिव्यष्टिरेतदुपहिताल्पज्ञत्वादिविशिष्टचैतन्यमेत-दनुपहितं चैतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं त्वम्पदवाच्यार्थो भवति ॥ १४६॥

एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानन्दं तुरीयं चैतन्यं त्वम्पदलक्ष्यार्थो भवति ॥ १४७॥

अथ महावाक्यार्थो वर्ण्यते । इदं तत्त्वमसिवाक्यं सम्बन्धत्रयेणाखण्डार्थबोधकं भवति ॥ १४८॥

सम्बन्धत्रयं नाम पदयोः सामानाधिकरण्यं

पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्म-
लक्षणयोर्लक्ष्यलक्षणभावश्चेति ॥ १४९॥

तदुक्तम् -
“सामानाधिकरण्यं च विशेषणविशेष्यता ।
लक्ष्यलक्षणसम्बन्धः पदार्थप्रत्यगात्मनाम् ॥” इति ॥ १५०॥

सामानाधिकरण्यसम्बन्धस्तावद्यथा सोऽयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्त-वाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्पर्यसम्बन्धः । तथा च तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पद-स्यापरोक्षत्वादि विशिष्टचैतन्यवाचकत्वम्पदस्य चैकस्मिंश्चैतन्ये तात्पर्यसम्बन्धः ॥ १५१॥

विशेषणविशेष्यभावसम्बन्धस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः । तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः ॥ १५२॥

लक्ष्यलक्षणसम्बन्धस्तु यथा तत्रैव सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः ।
तथात्रापि वाक्ये तत्त्वम्पदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादि-विशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः ॥ १५३॥

इयमेव भागलक्षणेत्युच्यते ॥ १५४॥

अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न सङ्गच्छते ॥ १५५॥

तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिभेदव्यावर्तकतयान्योन्यविशेषणविशेष्य-रूपसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रमाणान्तरविरोधाभावात्तद्वाक्यार्थः सङ्गच्छते ॥ १५६॥

अत्र तु तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वम्पदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणविरोधाद्वाक्यार्थो न सङ्गच्छते ॥ १५७॥

तदुक्तम् -
“संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥” इति (पञ्चदशी ७.७५) ॥ १५८॥

अत्र गङ्गायां घोषः प्रतिवसतीतिवाक्यवज्जहल्लक्षणापि न सङ्गच्छते ॥ १५९॥

तत्र तु गङ्गाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्सम्बन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा सङ्गच्छते ॥ १६०॥

अत्र तु परोक्षापरोक्षचैतन्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधाद्भागान्तरमपि परित्यज्यान्यलक्षणाया अयुक्तत्वाज्जहल्लक्षणा न सङ्गच्छते ॥ १६१॥

न च गङ्गापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वम्पदं वा स्वार्थपरित्यागेन त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कुतो जहल्लक्षणा न सङ्गच्छत इति वाच्यम् ॥ १६२॥

तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वम्पदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतर-पदार्थप्रतीत्यपेक्षाभावात् ॥ १६३॥

अत्र शोणो धावतीतिवाक्यवदजहल्लक्षणापि न सम्भवति ॥ १६४॥

तत्र शोणगुणगमनलक्षणस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसम्भवादजहल्लक्षणा सम्भवति ॥ १६५॥

अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य वाक्यार्थस्य विरुद्धत्वात्तदपरित्यागेन तत्सम्बन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासम्भवा-दजहल्लक्षणा न सम्भवत्येव ॥ १६६॥

न च तत्पदं त्वम्पदं वा स्वार्थविरुद्धांशपरित्यागेनां-शान्तरसहितं त्वम्पदार्थं तत्पदार्थं वा लक्षयत्वतः कथं प्रकारान्तरेण भागलक्षणाङ्गीकरणमिति वाच्यम् ॥ १६७॥

एकेन पदेन स्वार्थांशपदार्थान्तरोभयलक्षणाया

असम्भवात्पदान्तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च ॥ १६८॥

तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसीतिवाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वविशिष्टांशं परित्यज्याविरुद्धमखण्डचैतन्यमात्रं लक्षयतीति ॥ १६९॥

अथाधुनाहं ब्रह्मास्मि (बृ उ १.४.१०) इत्यनुभववाक्यार्थो वर्ण्यते ॥ १७०॥

एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वम्पदार्थौ शोधयित्वा वाक्येनाखण्डार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानन्दानन्ताद्वयं ब्रह्मास्मीत्यखण्डाकाराकारिता चित्तवृत्तिरुदेति ॥ १७१॥

सा तु चित्प्रतिबिम्बसहिता सती प्रत्यगभिन्नमज्ञातं परम्ब्रह्म विषयीकृत्य तद्गताज्ञानमेव बाधते तदा पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति ॥ १७२॥

तत्र प्रतिबिम्बितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासनासमर्था सती तयाभिभूता भवति तथा स्वयम्प्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्ह-तया
तेनाभिभूतं सत् स्वोपाधिभूताखण्डवृत्तेर्बाधितत्वाद्दर्पणाभावे मुखप्रतिबिम्बस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति ॥ १७३॥

एवं च सति “मनसैवानुद्रष्टव्यम्” (बृ उ ४.४.१९)
“यन्मनसा न मनुते”
(के उ १.५) इत्यनयोः श्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् ॥ १७४॥

तदुक्तम् -
“फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ।
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ॥” इति (पञ्चदशी ६.९०) ॥ १७५॥

“स्वयम्प्रकाशमानत्वान्नाभास उपयुज्यते ।” इति च (पञ्चदशी ६.९२) ॥ १७६॥

जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति ॥ १७७॥

तथाहि । अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन जडं घटमपि भासयति ॥ १७८॥

तदुक्तं -
"बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥" इति । (पञ्चदशी ७.९१) ॥ १७९॥

यथा दीपप्रभामण्डलमन्दकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकारनिरसनपुरःसरं स्वप्रभया तदपि भासयतीति ॥ १८०॥

---

५

एवं भूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवणमनन-निदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते ॥ १८१॥

श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानामद्वितीयवस्तुनि तात्पर्यावधारणम् ॥ १८२॥

लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि ॥ १८३॥

तदुक्तम् -
"उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥" ॥ १८४॥

प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन "एकमेवाद्वितीयम्" (६.२.१) इत्यादौ "ऐतदात्म्यमिदं सर्वम्" (६.८.७) इत्यन्ते च प्रतिपादनम् ॥ १८५॥

प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः । यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् ॥ १८६॥

प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तरा-विषयीकरणमपूर्वता । यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् ॥ १८७॥

फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य

वा तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र “आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्ये” (६.१४.२) इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते ॥ १८८॥

प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथा तत्रैव “उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्” (६.१.३) इत्यद्वितीयवस्तुप्रशंसनम् ॥ १८९॥

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रुयमाणा युक्तिरुपपत्तिः । यथा तत्र “यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्” (६.१.४) इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ॥ १९०॥

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनम् ॥ १९१॥

विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम् ॥ १९२॥

समाधिर्द्विविधः सविकल्पको निर्विकल्पश्चेति ॥ १९३॥

तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् ॥ १९४॥

तदा मृण्मयगजादिभानेऽपि मृद्भानवद्द्वैतभानेऽप्यद्वैतं वस्तु भासते ॥ १९५॥

तदुक्तम् -
“दृशिस्वरूपं गगनोपमं परम्
 सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयम्
तदेव चाहं सततं विमुक्तमोम् ॥” इति
(उपदेशसाहस्री ७३.१०.१) ॥ १९६॥

निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानम् ॥ १९७॥

तदा तु जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयवस्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते ॥ १९८॥

ततश्चास्य सुषुप्तेश्चाभेदशङ्का न भवति । उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमात्रेणानयोर्भेदोपपत्तेः ॥ १९९॥

अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः ॥ २००॥

तत्र “अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः” ॥ २०१॥

“शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः” ॥२०२॥

करचरणादिसंस्थानविशेषलक्षणानि पद्मस्वस्तिकादीन्यासनानि ॥ २०३॥

रेचकपूरककुम्भकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः ॥ २०४॥

इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः ॥ २०५॥

अद्वितीयवस्तुन्यन्तरिन्द्रियधारणं धारणा ॥ २०६.।

तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहो ध्यानम् ॥ २०७॥

समाधिस्तूक्तः सविकल्पक एव ॥ २०८॥

एवमस्याङ्गिनो निर्विकल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः सम्भवन्ति ॥ २०९॥

लयस्तावदखण्डवस्तनवलम्बनेन चित्तवृत्तेर्निद्रा ॥ २१०॥

अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं विक्षेपः ॥ २११॥

लयविक्षेपाभावेऽपि चित्तवृत्तेर्रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः ॥ २१२॥

अखण्डवस्त्वनवलम्बनेनापि चित्तवृत्तेः सविकल्पकानन्दास्वादनं रसास्वादः । समाध्यारम्भसमये सविकल्पकानन्दास्वादनं वा ॥ २१३॥

अनेन विघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखण्डचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पकः समाधिरित्युच्यते ॥ २१४॥

यदुक्तम् -
“लये सम्बोधयेच्चितं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥

नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेत्” इति च
(गौडपादकारिका ३.४४-४५)
“यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता” इति च
(गीता ६ - १९) ॥ २१५॥

---

६
अथ जीवन्मुक्तलक्षणमुच्यते ॥ २१६॥

जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन

तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि
साक्षात्कृतेऽज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि
बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ॥ २१७॥

“भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥”
इत्यादिश्रुतेः (मुण्ड उ २.२.८) ॥ २१८॥

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन
शरीरेणान्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेणाशना-
पिपासाशोकमोहादिभाजनेनान्तःकरणेन च पूर्वपूर्ववासनया
क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धारब्धफलानि
च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यते । यथेन्द्रजालमिति
ज्ञानवांस्तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति ॥ २१९॥

“सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव” इत्यादिश्रुतेः ॥ २२०॥

उक्तञ्च -
“सुषुप्तवज्जाग्रति यो न पश्यति
द्वयं च पश्यन्नपि चाद्वयत्वतः ॥

तथा च कुर्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥” इति (उपदेशसाहस्री ५) ॥ २२१॥

अथ ज्ञानात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिव-
च्छुभवासनानामेवानुवृत्तिर्भवति शुभाशुभयोरौदासीन्यं वा ॥ २२२॥

तदुक्तम् । -
“बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥ इति (नैष्कर्म्यसिद्धिः ४.६२)
“ब्रह्मवित्तं तथा मुक्त्वा स आत्मज्ञो न चेतरः ॥)” इति च (उपदेशसाहस्री ११५)
॥ २२३॥

तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्तन्ते
॥ २२४॥

तदुक्तम् -
“उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥” इति (नैष्कर्म्यसिद्धिः ४.६९) ॥
२२५॥

किं बहुनायं देहयात्रामात्रार्थमिच्छानिच्छा-

परेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्ध-
फलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः
संस्तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने
सत्यज्ञानतत्कार्यसंस्काराणामपि विनाशात्परमकैवल्य-
मानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डब्रह्मावतिष्ठते ॥ २२६॥

“न तस्य प्राणा उत्क्रामन्ति” (बृ उ ४.४.६)
“अत्रैव समवनीयन्ते” (बृ उ ३.२.११)
“विमुक्तश्च विमुच्यते” (कठ उ ५.१) इत्यादिश्रुतेः ॥ २२७॥

इति सदानन्द योगीन्द्र विरचितो वेदान्तसारनाम ग्रन्थः समाप्तः ।

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com
Proofread by Pranipata Chaitanya

.. Vedantasara ..
was typeset on August 3, 2016

Please send corrections to sanskrit@cheerful.com